DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 5th Semester Examination, 2023-24

## SANADSE01T-SANSKRIT (DSE1/2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

**सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्**

### क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः — 2×5 = 10

(क) रुद्रस्य तनुः कीदृशी आसीत् ?

(ख) रुद्रः कथं 'गिरित्र' इत्युच्यते ? 'अस्तवे' इति पदस्य कोऽर्थः ?

(ग) 'सर्वमिज्जगदयक्ष्मं सुमना असत्' — केन जगदिदम् अयक्ष्मं भवेत् ? अयक्ष्मम् इति शब्दस्य कोऽर्थः ?

(घ) 'विज्यं धनुः कपर्दिनो विशल्यो' — अत्र 'कपर्दिनः' इति पदस्य कोऽर्थः ? कश्च 'विज्यम्' इति पदस्य अर्थः ?

(ङ) 'नमस्ते रुद्र मन्यवे' इत्यत्र मन्यवे इति पदस्य कोऽर्थः ? रुद्रस्य इषवे कथं नमः क्रियते ?

(च) रुद्रसूक्ते ऋषिः कं कं च प्रणमति ?

(छ) रुद्रस्तुतिः कस्मिन् वेदे कस्मिन् अध्याये च वर्तते ?

### ख-विभागः

2. अधोलिखितेषु प्रश्नेषु ***यथेच्छमेकस्य*** प्रश्नस्य उत्तरं देयम् — 10×1 = 10

(क) कस्मिन् ब्राह्मणे मनुमत्स्यकथा लभ्यते ? अत्र प्लावनवर्णनं यथा प्राप्यते तथा समासेन लिखत। 1+9

(ख) 'यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवति' — केन कमुद्दिश्य किमर्थं च उक्तम् ? येनेदमुक्तं केन प्रकारेण हि तस्य पोषणं भवति ? अन्तिमे वक्ता किं करोति ? 1+2+2+2+3

### ग-विभागः

3. अधः प्रदत्तेषु विषयेषु ***यथेच्छमेकमाश्रित्य*** टीकां लिखत। 5×1 = 5

(क) उत्पथस्थितान्

(ख) हव्यकव्यम्

(ग) श्रीर्विषयसुखरसास्वादनाय

**अथवा**

अधःप्रदत्तेषु श्लोकेषु ***यथेच्छमेकं*** श्लोको व्याख्येयः। 5×1 = 5

(क) लोकेषु शास्त्रेषु च ये प्रसिद्धाः
काव्येषु ये सत्कविभिः प्रयुक्ताः।
उच्चित्य तांश्चित्तविनोदनाय
शब्दानहं धातुभिरुद्धरामि ॥

(ख) वृणते न परद्रव्यं गृह्णाति विदुषां गुणान्।
गर्हते हृदयं स्त्रीणां द्विषां गृह्यते शिरः॥

(ग) अस्त्यगस्त्यमुनिज्योत्स्ना-पवित्रे दक्षिणापथे।
कृष्णराज इति ख्याती राजा साम्राज्यदीक्षितः॥

DINABANDHU MAHAVIDYALAYA
Estd.-1947
CENTRAL LIBRARY

**घ-विभागः**

4. अधो दत्तेषु विषयेषु ***यथेच्छमेकमाश्रित्य*** टिप्पणीं लिखत। 5×1 = 5

(क) अतिथिदेवोभव

(ख) महासंहिता

(ग) भूर्भुवः सुवः

**अथवा**

अधोलिखितेषु उपनिषद्वाक्येषु ***यथेच्छमेकं*** व्याख्येयम्। 5×1 = 5

(क) माहाचमस्यः प्रवेदयते।

(ख) यान्यनवद्यानि कर्माणि। तानि सेवितव्यानि। नो इतराणि।

(ग) ब्रह्मणः कोशोऽसि मेधया पिहितः।

**ङ-विभागः**

5. ***यथेच्छमेकस्य*** प्रश्नस्योत्तरं विधेयम् — 10×1 = 10

(क) किं नाम ब्राह्मणम्? ऋग्वेदस्य कतिविधः ब्राह्मणग्रन्थः? नामानेदिष्ठाख्यानं कस्मिन् ब्राह्मणग्रन्थे लभ्यते? अस्मिन् आख्याने लब्धां कथां समासेन प्रतिपादयत। 1+1+2+6

(ख) किं नाम नामानोदिष्ठम्? तत् कुत्र विनियुज्यते? ऐतरेयब्राह्मणस्य विषयवैचित्र्यस्यालोचनं समासेन कुरुत। 1+1+8

**च-विभागः**

6. अधःप्रदत्तेषु पदेषु यथेच्छं ***द्वयोः*** पदयोः रूपसाधनं कुरुत। 5×2 = 10

गार्गी, इन्द्राणी, दात्री, सूर्या, साधिका

**अथवा**

यथेच्छं ***सूत्रद्वयं*** व्याख्येयम् — 5×2 = 10

(क) वयसि प्रथमे

(ख) यञश्च

(ग) हलस्तद्धितस्य

(घ) ऋन्नेभ्यो ङीप्।

——×——